"चीराणि किं पथि न सन्ति दिशन्ति भिक्षां नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ॥")
गोस्तनः । वस्त्रभेदः । (यथा, मनुः ।११।१०१।
"चीरवासा द्विजोऽरण्ये चरेद्‌ब्रह्महणो व्रतम् ॥")
रेखाभेदः । लेखनभेदः । इति मेदिनी ॥ चूड़ा ।
(यथा, महाभारते । ३ । ११ । ४६ ।
"शुक्लवल्कलैरीभूता बहवस्तत्र पादपाः ।
चीराणीव युदस्तानि रेजुस्तत्र महावने ॥")
सीसकम् । इति हेमचन्द्रः ॥

चीरकः, पुं, (चीर+संज्ञायां कन् ।) विक्रियालेखः । विकारलेखनम् । इति विश्वः ॥ (स्वार्थे कनि चीरशब्दार्थोऽप्यत्र ॥)

चीरपत्रिका, स्त्री, (चीरमिव पत्रमस्य । ततः कन् टापि अत इत्वञ्च ।) चञ्चुशाकः । इति राजनिर्घण्टः ॥

चीरपर्णः, पुं, (चीरमिव पर्णमस्य ।) शालवृक्षः । इति राजनिर्घण्टः ॥ (विवृतिरस्य शालशब्दे विज्ञेया ॥)

चीरिः, स्त्री, (चि+बाहुलकात् क्रिः दीर्घश्च ।) नेत्रांशुकम् । इति शब्दरत्नावली ॥

चीरिका, स्त्री, (चीरीति कृत्वा कायति शब्दायते इति । कै+कः ।) झिल्ली । इति हेमचन्द्रः ॥

चीरितच्छदा, स्त्री, (चीरितः चीरमिव जातश्छदः पत्रं यस्याः ।) पालङ्कशाकम् । इति भावप्रकाशः ॥

चीरी, स्त्री, (चीरि+"कृदिकारादिति ।" वा ङीष् ।) कच्छाटिका । झिल्ली । इति हेमचन्द्रः ॥

चीरुकं, क्ली, (ची इति कृत्वा रौति । रु+क्विप् । चीरुर्झिल्लीपतङ्गः स इव इति इवार्थे कन् ।) फलविशेषः । चैँहर इतिभाषा ॥ अस्य गुणाः । रुचिदाहकफपित्तकारित्वम् । अम्लत्वञ्च । इति राजवल्लभः ॥

चीर्णं, त्रि, (चर+क्त । पृषोदरात् साधुः ।) शीलितम् । इति त्रिकाण्डशेषः ॥

चीर्णपर्णः, पुं, (चीर्णं विदीर्णं पर्णमस्य ।) निम्बवृक्षः । खर्ज्जूरवृक्षः । इति मेदिनी ॥

चीलिका, स्त्री, (चीरिका+रस्य लत्वे साधुः ।) चीरिका । झिल्ली । इति शब्दरत्नावली ॥

चील्लका, स्त्री, (चीलिका+पृषोदरात् साधुः । चीदिति शब्देन लक्ष्यते इति । लक्ष+घञ् । ततः पृषोदरादित्वात् साधुः इति वा ।) झिल्ली । इति शब्दरत्नावली ॥

चीव, ऋ ञ ग्रहणे । संवृतौ । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ऋ, अचिचीवत् । ञ, चीवति चीवते वल्कलं भिक्षुः । गृह्णाति परिदधाति वेत्यर्थः । इति दुर्गादासः ॥

चीव, क्र दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, चीवयति । इति दुर्गादासः ॥

चीवरं, क्ली, (चीयते तन्तुसन्तानैरिति । चि+"चित्वरच्छत्वरधीवरेति ।" उणां । ३ । १ । इति ष्वरच् । निपातनात् धातोर्दीर्घत्वे साधुः ।) भिक्षुवस्त्रम् । इत्युणादिकोषः ॥ (यथा, महाभारते । १ । ६१ । १२ ।
"अनग्निरनिकेतश्चाप्यगोत्रचरणो मुनिः ।
कौपीनाच्छादनं यावत्तावदिच्छेच्च चीवरम् ॥")

चीवरी, [न्] पुं, (चीवरं अस्त्यस्येति । इनिः ।) बुद्धभिक्षुकः । इति त्रिकाण्डशेषः ॥

चुक्क, क व्यथायाम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) कोपधः पञ्चमस्वरमध्यः । व्यथिः पीड़नम् । क, चुक्कयति शत्रुं शूरः । इति दुर्गादासः ॥

चुक्कारः, पुं, (चुक्क+भावे अप् । चुक्कं पीड़नं आराति सम्यक् ददातीति । सिंहनादश्रवणेन भीरूणां भयजनकत्वात्तथात्वम् । आ+रा+कः ।) सिंहनादः । इति त्रिकाण्डशेषः ॥

चुक्रं, क्ली, (चकते तृप्यत्यनेन इति । चक+"स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्विताभ्यो रक्" उपधाया उत्वञ्च ।) अम्लद्रव्यविशेषः । महादा इति ख्यातम् । तत्पर्य्यायः । तिन्तिड़ीकम् २ वृक्षाम्लम् ३ । इत्यमरः । २ । ९ । ३५ ॥ चुक्रकम् ४ । इति शब्दरत्नावली ॥ महाम्लम् ५ । इति जटाधरः ॥ (अम्लवृक्षकम् ६ । इति भावप्रकाशः । १ । १ ॥) पत्रशाकविशेषः । चुक इति भाषा ॥ तत्पर्य्यायः । चुक्रवास्तूकम् २ शिक्रुचम् ३ अम्लवास्तुकम् ४ दन्ताम्लम् ५ अम्लशाकाख्यम् ६ अम्लादि ७ हिलमोचिका ८ । अस्य गुणाः । अल्पपक्वत्वम् । लघुत्वम् । उष्णत्वम् । वातगुल्मनाशित्वम् । रुच्यशोषतृपित्तकारित्वम् । पथ्यत्वम् । तत्पर्य्यायगुणाः ।
"चुक्रिया स्यात्तु पत्राम्ला रोचनी शतवेधिनी ।
चुक्रा त्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत् ॥
रुच्या लघुतरा पाके वृन्ताके नातिरोचनी ॥"
इति भावप्रकाशः ॥ * ॥
("चुक्रमत्यम्लमुष्णञ्च दीपनं पाचनं परम् ।
शूलगुल्मविबन्धामवातश्लेष्महरं परम् ॥
वमिलघ्वास्यवैरस्यहृत्पीड़ावह्निमान्द्यहृत् ॥"
इति शब्दार्थचिन्तामणिधृतवैद्यकम् ॥)
काञ्जिकप्रभेदः । तत्पर्य्यायः । सहस्रवेधम् २ रसाम्लम् ३ चुक्रवेधकम् ४ शाकाम्लभेदनम् ५ चन्द्रम् ६ अम्लसारम् ७ चुक्रिका ८ । अस्य गुणाः । तिक्तत्वम् । अम्लत्वम् । स्वादुत्वम् । कफपित्तनासिकारोगदुर्गन्धशिरोरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥*॥ सन्धानविशेषः । यथा,
"यन्मस्त्वादिशुचौ भाण्डे सगुड़क्षौद्रकाञ्जिकम् ।
धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते ॥
द्विगुणं गुड़मध्वारनालमस्तु क्रमादिह ॥"
इति परिभाषा ॥
(अस्य लक्षणं यथा,—
"विनष्टे संहितो यस्तु तच्चुक्रमभिधीयते ॥"
इति शार्ङ्गधरे मध्यखण्डे दशमेऽध्याये ॥)

चुक्रः, पुं, (चकते तृप्यतेऽनेनेति । चक+रक् उपधाया उत्वञ्च ।) अम्लः । अम्लवेतसः । इति विश्वः ॥

चुक्रकं, क्ली, (चुक्र+संज्ञायां कन् ।) शाकविशेषः । चुकापालङ्ग इति भाषा ॥ अस्य गुणाः । दुर्ज्जरत्वम् । भेदकत्वम् । वायुनाशित्वम् । पित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ (चुक्रार्थे स्वार्थे कन् ॥)

चुक्रफलं, क्ली, (चुक्रमेव फलं यस्य । चुक्रं फलति वा । फल+अच् ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥ (वृक्षाम्लशब्देऽस्य विशेषो ज्ञातव्यः ॥)

चुक्रा, स्त्री, (चुक्रः अम्लत्वं विद्यतेऽस्य इत्यच् टाप् च ।) चाङ्गेरी । इति मेदिनी । रे, ३५ ॥ आमरुल् इति भाषा ॥ (अस्या गुणा यथा,—
"चुक्रा त्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत् ।
रुच्या लघुतरा पाके वृन्ताके नातिरोचनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तिन्तिड़ी । इति शब्दरत्नावली ॥ (यथास्याः पर्य्यायाः भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च ।
अम्ला च चिञ्चिका चिञ्चा तिन्तिड़ीका च तिन्तिड़ी ॥")

चुक्राम्लं, क्ली, (चुक्रमिव अम्लम् । चुक्रवदम्लोऽत्र इति वा ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥ (वृक्षाम्लशब्दे विवृतिरस्य ज्ञेया ॥)

चुक्राम्ला, स्त्री, (चुक्रमिव अम्लः अम्लत्वं विद्यतेऽस्याः । अच् टाप् च ।) अम्ललोणिका । चिञ्चा । काञ्जिकभेदः । इति राजनिर्घण्टः ॥

चुक्रिका, स्त्री, (चुक्रो विद्यतेऽस्मिन् इति । ठन् टाप् च ।) अम्ललोणिका । इत्यमरः । २ । ४ । १४० ॥ (अस्याः पर्य्याया यथा, भावप्रकाशे ।
"चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ।
अश्मन्तकस्तु शफरी कुशली चाम्लपत्रकः ॥")
कुचाङ्गेरी । इति रत्नमाला ॥ चुकापालङ्ग इति भाषा ॥ (यथास्याः पर्य्यायाः ।
"चुक्रिका स्यात्तु पत्राम्ला रोचिनी शतवेधिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
तिन्तिड़ी । तत्पर्य्याया यथा, तत्रैव ।
"अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च ॥
अम्ला च चिञ्चिका चिञ्चा तिन्तिड़ीका च तिन्तिड़ी ॥")

चुचुकं, क्ली, (चुचु इत्यव्यक्तशब्देन कायति पानकाले इति । कै+कः ।) कुचाग्रम् । तत्पर्य्यायः । चूचुकम् २ चुचूकम् ३ । इति शब्दरत्नावली ॥ कुचाननम् ४ । पुंलिङ्गोऽपि । इति रत्नकोषः ॥ स्तनवृन्तम् ५ । इत्यमरटीकायां भरतः ॥ (देशविशेषे तद्देशवासिषु च पुं । यथा, महाभारते । १२ । २०७ । ४२ ।
"दक्षिणापथजन्मानः सर्व्वे नरवरान्ध्रकाः ।
गुहाः पुलिन्दाः शवराश्चुचुका मद्रकैः सह ॥")

चुचूः, पुं, सुनिषण्णशाकम् । इति त्रिकाण्डशेषः ॥

चुचूकं, क्ली, (चुचुक+पृषोदरादित्वात् दीर्घः ।) चुचुकम् । इति शब्दरत्नावली ॥

चुच्च, ई अभिषवे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सकञ्च-सेट् ।) तालव्यवर्गाद्योपधः । पञ्च-